# आदर्शप्रश्नपत्रम् - 2023-2024
## संस्कृतम् (केन्द्रिकम्) कोड् सङ्ख्या -322
## कक्षा – द्वादशी

**समयः – होरात्रयम्** **पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 12 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखाः प्रश्नाः सन्ति।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
- उत्तरलेखनात् पूर्वं प्रश्नपत्रानुसारं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम् -**

**अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति -**

| | |
|---|---|
| **खण्डः (क) अपठित-अवबोधनम्** | - 10 अङ्काः |
| **खण्डः (ख) रचनात्मककार्यम्** | - 15 अङ्काः |
| **खण्डः (ग) अनुप्रयुक्तव्याकरणम्** | - 20 अङ्काः |
| **खण्डः (घ) I. पठित-अवबोधनम्** | - 25 अङ्काः |
| **II. संस्कृत-साहित्येतिहास-परिचयः** | - 10 अङ्काः |

## खण्डः – क
## अपठितावबोधनम् - 10 अङ्काः

| | | |
|---|---|---|
| 1. | *** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत –**<br>"संहतिः कार्यसाधिका' इति वचनं जगति प्रसिद्धमस्ति। एकेन पुरुषेण किमपि महत्कार्यं न साध्यते। यत्किमपि साधयितुं नराणां सङ्घः परमावश्यकः। सर्वे जानन्ति यत् न एकः तन्तुः किमपि कर्तुं समर्थः। परन्तु तैः रचिता रज्जुः हस्तिनमपि बद्धुं समर्था भवति। इत्थमेव एकेन तण्डुलेन नहि ओदनं पच्यते। गृहेषु मातरः पितरः भ्रातरः च एकीभूय गृहभारं वहन्तः सुखमनुभवन्ति। एवमेव मनुष्याणां समाजोऽपि देशं जातिश्च उन्नतिपथं नेतुं समर्थः भवति। | 10 |

| | | |
|---|---|---|
| | यस्मिन् राष्ट्रे सर्वे मानवा:, सर्वाणि राज्यानि च भेदभावं परित्यज्य एकतया व्यवहरन्ति तद्राष्ट्रं जनशक्त्या संसारस्य मुकुटमणिरिव समुज्ज्वलं भवति। एकतायाः प्रभावेण भारतीयाः स्वदेशम् आङ्ग्लहस्तात् मोचयितुं समर्थाः अभवन्। अतः सदा सर्वैः मानवैः सङ्घे स्थित्वा स्वशक्तेः सञ्चयः कर्तव्यः। अधुनापि यदि वयं सङ्घीभूय स्थास्यामः तर्हि अवश्यमेव शत्रून् जेतुं समर्था: भविष्यामः। <br><br> **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** <br> (i) मानवैः सङ्घे स्थित्वा कस्याः सञ्चयः कर्तव्यः? <br> (ii) किमपि साधयितुं केषां सङ्घः परमावश्यकः ? <br> (ii) रज्जुः कं बद्धुं समर्था भवति ? <br> **(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** <br> (i) जगति किं प्रसिद्धमस्ति ? <br> (ii) राष्ट्रं कथं समुज्ज्वलं भवति ? <br> (iii) वयं कथं शत्रून् जेतुं समर्था: भविष्यामः? <br> **(इ) अनुच्छेदस्य (द्वित्रिशब्दात्मकं) समुचितं शीर्षकं लिखत।** <br> **(ई) यथानिर्देशम् उत्तरत- केवलं प्रश्नत्रयम्** <br> (i) "निर्मिता" इत्यर्थे किं पदं गद्यांशे प्रयुक्तम्? <br> (क) प्रभावः (ख) समर्था <br> (ग) रचिता (घ) भवति <br> **(ii) "भारतीयाः स्वदेशम् आङ्ग्लहस्तात् मोचयितुं समर्थाः अभवन्"। इत्यत्र 'अभवन्" इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?** <br> (क) भारतीयाः (ख) समर्थाः <br> (ग) आङ्ग्लहस्तात् (घ) स्वदेशम् <br> **(iii) "सर्वैः" इत्यस्य विशेषणपदस्य किं विशेष्यमत्र प्रयुक्तम्?** <br> (क) सदा (ख) देशम् <br> (ग) मोचयितुम् (घ) मानवैः <br> **(iv) "अनेकतायाः" इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?** <br> (क) जनशक्त्या (ख) एकतायाः <br> (ग) भारतीयाः (घ) परित्यज्य | <br><br><br><br><br> 1×2=2 <br><br><br><br> 2×2=4 <br><br><br><br> 1×1=1 <br> 1×3=3 |
| | | |

## खण्डः – ख
## रचनात्मक–कार्यम् - 15 अङ्काः

**2.** *** भवान् आदित्यः। मुम्बई-नगरे वसति। भवान् गतसप्ताहे संस्कृतसम्भाषणशिबिरे भागं गृहीतवान्। तदधिकृत्य मित्रं रमेशं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखतु–** **½×10=5**

मुम्बईनगरतः
तिथिः- --------------

प्रिय मित्र (i)----------
सस्नेहं नमः।

अत्र कुशलं तत्रास्तु। गतसप्ताहे अस्माकं (ii) --------- संस्कृतसम्भाषणशिबिरम् (iii) ---------- आसीत्। चतुर्दशदिनानि यावत् वयं संस्कृतसम्भाषणस्य (iv) ---------- अकुर्म। तत्र एकस्याः लघुनाटिकायाः (v) ----------- अपि अभवत्। अहं तु विदूषकस्य (vi) ------------- कृतवान्। सर्वे जनाः हसित्वा हसित्वा (vii) --------------अकुर्वन्। अहम् इदानीं सर्वदा संस्कृतेन एव सम्भाषणम् (viii) -------------। भवान् अपि संस्कृतेन सम्भाषणस्य अभ्यासं (ix) ------------। पितृभ्यां मम (x) ------------- निवेदयतु।

भवतः मित्रम्
आदित्यः।

**मञ्जूषा**

| |
|---|
| अभिनयम्, अभ्यासम्, प्रणामाञ्जलिम्, विद्यालये, मञ्चनम्, आयोजितम्, करतलध्वनिम्, करोमि, रमेश, करोतु। |

**3.** *** मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितायां कथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत -** **½×10=5**

कस्मिंश्चित् नगरे कश्चन दरिद्रः ब्राह्मणः वसति स्म। सः भिक्षाटनेन जीविकार्जनं करोति स्म। कदाचित् सः पिष्टेन पूर्णम् एकं ( i) -------------- प्राप्तवान्। तं घटं नागदन्ते अवलम्ब्य तस्य अधः उपविश्य सः एकदृष्ट्या घटमेव पश्यति स्म। एकदा रात्रौ सः (ii) ------------ यदि देशे दुर्भिक्षः भवेत् तर्हि एतस्य शतरूप्यकाणां मूल्यं भवेत्। तदा अहम् एतं घटं विक्रीय तेन धनेन अजद्वयं क्रेष्यामि। कालान्तरे तेन (iii) ----------------- एव भविष्यति। अनन्तरम् अजसमूहं (iv) -------------- धेनूः क्रेष्यामि। अनन्तरं ताः विक्रीय महिषीः ताः विक्रीय

अश्वान् च क्रेष्यामि। तान् अपि विक्रीय यथेष्टं धनं (v) ----------। तेन बृहत् गृहं निर्मापयिष्यामि। तदा कश्चित् (vi) -------------- आगत्य रूपवतीं स्वकन्यां मह्यं दास्यति। अनन्तरं मम पुत्रः जनिष्यते। देवशर्मा इति तस्य (vii) --------------- करिष्यामि। यदा सः जानुभ्यां चलितुं समर्थः भविष्यति तदा अहम् अश्वशालायां (viii) ------------ पठिष्यामि। तदा देवशर्मा जानुभ्यां चलन् मम समीपम् आगन्तुम् उद्युक्तः भविष्यति। तदा तं बालं ग्रहीतुं तस्य (ix) ------------ आज्ञापयिष्यामि। यदा सा मम वचनं न श्रोष्यति तदा अहं कोपेन पादप्रहारेण तां दण्डयिष्यामि एवं चिन्तयन् सः (x) --------------- कृतवान् एव। पिष्टेन पूर्णः घटः पतितः, भग्नः च। "

**मञ्जूषा**

| |
|---|
| सम्पादयिष्यामि, विक्रीय, ब्राह्मणः, चिन्तितवान्, नामकरणम्, पादप्रहारम्, मातरम्, घटम्, अजसमूहः, पुस्तकम् |

**अथवा**

*** अधोलिखितसंवादे रिक्तस्थानानि पूरयत-** 1×5=5

**तन्वी** - सखि अवनि! भवती ह्य: विद्यालयं न आगतवती। अपि कुशलिनी त्वम्?

**अवनि** - तन्वि ! (i) ---------------------------------।

**तन्वी** - तर्हि ह्य: विद्यालयं किमर्थं नागता ?

**अवनि** – (ii) ----------------------------------------।

**तन्वी** - अहो! पक्षिविहारम् अगच्छत्। बहूत्तमम्। कुत्रास्ति पक्षिविहारः ?

**अवनि** - (iii) --------------------------------------।

**तन्वी** - 'नोएडा' इति नगरस्थस्य पक्षिविहारस्य विषये तु अहमपि श्रुतवती। के के खगाः दृष्टाः तत्र ?

**अवनि** – तत्र अनेके दुर्लभाः खगाः दृष्टा:, यथा काष्ठकूटः, नीलकण्ठ: विविधाः चटका: च।

**तन्वी** - अहो ! दुर्लभाः खगाः अपि दृष्टा:। अस्माकं पितरः तु कथयन्ति यत् तेषां शैशवावस्थायाम् अनेके खगाः गृहेषु इतस्ततः विचरन्ति स्म।

**अवनि** - वस्तुतः अद्यत्वे नगरेषु तु पक्षिणां दर्शनं प्रायः दुर्लभमेव।

**तन्वी** - सत्यं वदति भवती। (iv) ---------------------------------।

**अवनि** - भवती अपि पक्षिविहारं द्रष्टुम् अवश्यं गच्छतु।

**तन्वी** - आम् सखि! (v) ----------------------------------।

| | | |
|---|---|---|
| 4. | * **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत –**<br>(i) तुम खेलने कब जाओगे ?<br>When will you go to play?<br>(ii) लतिका और कनिका पढ रही हैं।<br>Latika and Kanika are studying.<br>(iii) क्या मैं बाहर जाऊँ ?<br>shall I go to play?<br>(iv) तुम सब यहाँ क्या कर रहे हो ?<br>What are you all doing here?<br>(v) चेतन चित्र बना रहा है।<br>Chetan is drawing a picture.<br>(vi) कल बुधवार था।<br>Yesterday was Wednesday. | 1×5=5 |
| | | |
| | **खण्डः – ग**<br>**अनुप्रयुक्तव्याकरणम्  20 अङ्काः** | |
| 5. | * **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं सन्धिं वा कुरुत- (केवलं प्रश्नषट्कम्)**<br>(i) मद्गार्हस्थ्यं तु **त्वत्+अधीनं** भविष्यति।<br>(ii) ततो **यान्ति+अधमां** गतिम्।<br>(iii) यद्यपि **देवादेशः** प्रमाणम् ।<br>(iv) शठः **सहस्रैरपि** शिक्ष्यमाणः।<br>(v) दीपस्य समीपमागत्य **संन्यासिनोक्तम्**।<br>(vi) वैवस्वतो **मनुर्नाम** मनीषिणां माननीयः।<br>(vii) **तावन्मम** बालभावःस एव। | 1×6=6 |
| 6 | * **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नपञ्चकम्)**<br>(i) **ज्ञानोदधिः** अनन्तपारः।<br>(क) ज्ञानस्य उदधिः (ख) ज्ञाने उदधिः<br>(ग) ज्ञानम् उदधिः (घ) ज्ञानाय उदधिः | 1×5=5 |

| | | |
|---|---|---|
| | (ii) किं **<u>महान् चासौ राजा</u>** परित्रातव्यः?<br>(क) महाराजम् (ख) महाराजा<br>(ग) महाराजः (घ) महान्राजः<br>(iii) स एव **<u>उचितम् अनतिक्रम्य</u>** व्यवहरिष्यति।<br>(क) सोचितम् (ख) यथोचितम्<br>(ग) यदोचितम् (घ) अनुचितम्<br>(iv) त्यागाय **मितं भाषन्ते ये तेषाम्** ।<br>(क) मितभाषिणाम् (ख) मितभाषी<br>(ग) मितभाषिणः (घ) मितभाषिन्<br>(v) परस्परम् अनुव्रतौ पतिपत्न्यौ **<u>त्रिवर्गं</u>** साधयतः ।<br>(क) त्रयाणां वर्गाणां समाहारः (ख) त्रीन् वर्गान्<br>(ग) त्रयः वर्गाः यस्य सः , तम् (घ) वर्गाणां त्रयम्<br>(vi) **आचार्यदेवो** भव।<br>(क) आचार्यस्य देवः (ख) देवः एव आचार्यः<br>(ग) देवस्य आचार्यः (घ) आचार्यः देवो यस्य सः | |
| | | |
| 7. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं च प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)**<br>(i) तदन्वये शुद्धिमति **<u>प्रसूतः</u>** शुद्धिमत्तरः।<br>(क) प्र+सू+क्तिन् (ख) प्र+सू+क्तवतु<br>(ग) प्र+सू+क्त (घ) प्र+सू+तल्<br>(ii) किं क्षमा **<u>निर्मनस्विन् + तल्।</u>**<br>(क) निर्मनस्वित (ख) निर्मनस्वित्वम्<br>(ग) निर्मनस्वितला (घ) निर्मनस्विता<br>(iii) ताते धनुर्न मयि सत्यम्- **<u>अव + ईक्ष् + शानच्</u>**।<br>(क) अवेक्ष्यमाणे (ख) अवीक्षशानच्<br>(ग) अवीक्षशानः (घ) अवीक्षमाने<br>(iv) **<u>युज्+क्त</u>** आयुक्ताः च यथा वर्तेरन् तथा वर्तेथाः।<br>(क) युक्तः (ख) युज्क्ताः<br>(ग) युक्ताः (घ) युधन् | 1×6=6 |

| | | |
|---|---|---|
| | (v) **<u>एकाकिनी</u>** एव नर्तिष्यसि ।<br>(क) एकाकिन् +इनी (ख) एकाकिन्+ङीप्<br>(ग) एकाकिन्+ई (घ) एकाकिन्+इनि<br>(vi) यान्यनवद्यानि कर्माणि तानि **<u>सेव्+तव्यत्</u>**।<br>(क) सेवितव्यत् (ख) सेवतव्यम्<br>(ग) सेवितव्यानि (घ) सेवितव्यतानि<br>(vii) भगवन् ! **<u>संन्यास+इनि</u>** तुरीयाश्रमसेवीति प्रणम्यते।<br>(क) संन्यासिनि (ख) संन्यासी<br>(ग) संन्यासिनी (घ) संन्यासिन् | |
| | | |
| 8. | समुचितम् उपपदविभक्तिरूपं चिनुत – (केवलं प्रश्नत्रयम्)<br>(i) राजा राज्यं................ दत्त्वा तदुत्सङ्गे भोजं मुमोच।<br>(क) मुञ्जम् (ख) मुञ्जाय<br>(ग) मुञ्जस्य (घ) मुञ्जे<br>(ii) द्वादशवर्षेण..............अनुगम्यमानः संन्यासी दृष्टः।<br>(क) भिक्षावटुना (ख) भिक्षावटवे<br>(ग) भिक्षावटुभिः (घ) भिक्षावटुम्<br>(iii) ........... न प्रमदितव्यम् ।<br>(क) स्वाध्येन (ख) स्वाध्यायस्य<br>(ग) स्वाध्याये (घ) स्वाध्यायात्<br>(iv) दिलीपस्य --------- सदृशागमः आसीत्।<br>(क) प्रज्ञां (ख) प्रज्ञासु<br>(ग) प्रज्ञया (घ) प्रज्ञायाः | 1×3=3 |

| | | |
|---|---|---|
| | **खण्डः – घ भागः – I**<br>**पठितांशावबोधनम् 25 अङ्काः** | |
| 9. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत –**<br>शोकसन्तप्तो मुञ्जः प्रायश्चित्तं कर्तुम् आत्मनो वह्नौ प्रवेशनं निश्चितवान्। राज्ञः वह्निप्रवेशकार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः - शनैः प्राह - तात! मया भोजराजो रक्षित एवास्ति। पुनः बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराजः ततो निष्क्रान्तः। पुनः राज्ञो वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः। सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः प्रावोचत् - हे योगीन्द्र ! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति। अथ कापालिकस्तं प्रावोचद् - राजन्! मा भैषीः। शिवप्रसादेन स जीवितो भविष्यति। तदा श्मशानभूमौ कापालिकस्य योजनानुसारं भोजः तत्र समानीतः। 'योगिना भोजो जीवितः' इति कथा लोकेषु प्रसृता। पुनः गजेन्द्रारूढो भोजो राजभवनमगात्। सन्तुष्टो राजा मुञ्जः भोजं निजसिंहासने निवेश्य निजपट्टराज्ञीभिश्च सह तपोवनभूमिं गत्वा परं तपस्तेपे। भोजश्चापि चिरं प्रजाः पालितवान्। | 5 |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) राज्ञ: वह्निप्रवेशकाले कः सभाम् आगतः ?<br>(ii) कः गजेन्द्रारूढ: भूत्वा राजभवनम् अगात् ?<br>(iii) कस्य योजनानुसारं भोजः श्मशानभूमौ समानीतः ? | ½×2=1 |
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः किं प्रावोचत् ?<br>(ii) शोकसन्तप्त: मुञ्जः प्रायश्चित्तं कर्तुं किं निश्चितवान्?<br>(iii) कापालिक: किं प्रावोचत् ? | 1×2=2 |
| | *** इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) 'पालितवान्' इति क्रियापदस्य कर्तृपदं किम्?<br>(ii) 'आकर्ण्य' इत्यस्य पर्यायपदं किम् ?<br>(iii) 'सभामागतं कापालिकम्' इत्यनयो: विशेषणपदं किम् ? | 1×2=2 |
| | | |
| 10. | **अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**<br>**प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।**<br>**न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते ॥**<br>**एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।**<br>**प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः।।** | 5 |

| | | |
|---|---|---|
| | अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) आसुराः जनाः कस्य क्षयाय प्रभवन्ति ?<br>(ii) कीदृशाः जनाः प्रवृत्तिं निवृत्तिं च न विदुः ?<br>(iii) सत्यं केषु न विद्यते ?<br>आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) आसुरेषु मनुजेषु किं किं न विद्यते?<br>(ii) कीदृशाः जनाः जगतः क्षयाय प्रभवन्ति?<br>(iii) आसुराः जनाः किं न विदुः ?<br>* इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) 'विनाशाय' इत्यर्थे किं पदमत्र प्रयुक्तम् ?<br>(ii) 'असत्यम्' इत्यस्य किं विपर्ययम् प्रयुक्तमत्र ?<br>(iii) 'एताम्' इति विशेषणस्य किं विशेष्यम् अत्र प्रयुक्तम्? | ½×2=1<br><br><br><br>1×2=2<br><br><br><br>1×2=2 |
| | | |
| 11. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -<br>ऋतध्वजः - आम्! अत एव प्रष्टुमुत्सहे किं गन्धर्वराजविश्वावसुमहाभागाः अपि स्वपत्नीं युधिष्ठिर इव हारितवन्तः हरिश्चन्द्र इव विक्रीतवन्तः ?<br>कुण्डला - मदालसे! तूष्णीं किमर्थं तिष्ठसि? देहि प्रत्युत्तरम्।<br>ऋतध्वजः - एकस्य अपराधेन सर्वा जातिः दण्ड्या इति विचित्रो न्यायः तव सख्याः।<br>मदालसा - अत्रभवन्तः नारीस्वाधीनतामधिकृत्य किं कथयन्ति ?<br>ऋतध्वजः - माता एव प्रथमा आचार्या इत्यस्ति मे अवधारणा। नारी एव समस्तसृष्टेः निर्मात्री। परं कथनेन किम्? परीक्ष्य एव ज्ञास्यति अत्रभवती। परीक्षार्थमुद्यतोऽस्मि गृहस्थाश्रमप्रयोगशालायाम्।<br>मदालसा- स्वीकृत: प्रस्तावः।<br>कुण्डला- दिष्ट्या वर्धेथां युवाम्। मित्रवर, गन्धर्वकन्या मदालसा गान्धर्वविवाह-विधिना वृणोति अत्रभवन्तम्। आकारये अहं कुलगुरुं तुम्बुरुम्। असौ अग्निं साक्षीकृत्य आशीर्वचांसि वक्ष्यति।<br>अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) नारी कस्याः निर्मात्री ?<br>(ii) कुलगुरु तुम्बुरुः किं वक्ष्यति ?<br>(iii) मदालसा केन विधिना ऋतध्वजं वृणोति ?<br>आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) मदालसा किं पृच्छति ? | 5<br><br><br><br><br><br><br><br><br><br><br><br>½×2=1<br><br><br><br>1×2=2 |

| | | |
|---|---|---|
| | (ii) ऋतध्वजः किमर्थम् उद्यतः आसीत्?<br>(iii) ऋतध्वजः किं प्रष्टुम् उत्सहते ?<br>*** इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) "मौनम्" इत्यस्य समानार्थकपदं नाट्यांशात् चित्वा लिखत।<br>(ii) "पराधीनताम्" इत्यस्य विलोमपदं नाट्यांशात् चित्वा लिखत।<br>(iii) 'विचित्रो न्याय: तव सख्या: "इत्यस्मिन् वाक्ये "तव" इति सर्वनामपदं कस्मै प्रयुक्तम् ? | 1×2=2 |
| | | |
| 12. | **पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –**<br>**एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।**<br>**आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी।**<br>**भावार्थः** - यथा एकाकिना (क)------------एव रात्रिः (ख)----------- भवति, तथैव एकेन (ग) -----------सुपुत्रेण सम्पूर्ण: वंशः प्रसन्नतां याति।<br>**मञ्जूषा**<br>विद्यायुक्तेन, चन्द्रेण, सुशोभिता<br><br>**अथवा**<br>**प्रदत्तात् भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-**<br>**(अ) कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।**<br>(i) य: मनुष्य: कर्माणि आरभते स: समृद्धिं प्राप्नोति।<br>(ii) पुरुष: श्रियं न प्राप्नोति<br>(iii) कर्मणा पुरुष: लक्ष्मीं न निषेवते।<br>**(आ) दोषेषु यत्न: सुमहान् खलानाम्।**<br>(i) महतां जनानां दोषेषु यत्न: भवति।<br>(ii) दुष्टजनानां दोषेषु एव यत्न: भवति।<br>(iii) दुष्टकार्येषु प्रयत्न: न करणीय:।<br>**(इ) द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।**<br>(i) राज्ञे सज्जनः सदैव शत्रुवत् भवति स्म यथा रुग्णाय औषधम्।<br>(ii) राज्ञे सज्जनः शत्रुः सन्नपि सम्माननीयः आसीत् यथा रुग्णाय औषधम्।<br>(iii) रोगी जन: कदापि औषधं न स्वीकरोति औषधं तस्य शत्रु इव। | 1×3=3<br><br><br><br><br><br><br><br><br><br>1×3=3 |
| | | |

| | | |
|---|---|---|
| 13. | अधोलिखित- श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत –<br>**असौ मया हतः शत्रुर्हनिष्ये चापरानपि।**<br>**ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।।**<br>**अन्वयः-** असौ शत्रुः मया हतः (i) ............. अपि च (अहम्) हनिष्ये। (ii) ……......... भोगी, अहम् (iii) .................... अहं सिद्धः बलवान् सुखी (चास्मि)।<br>**मञ्जूषा**<br>अहम्, ईश्वरः, अपरान् | 1×3=3 |
| | | |
| 14. | ‘क’ स्तम्भस्य वाक्यानां ‘ख’ स्तम्भस्य वाक्यैः सह मेलनं कुरुत -<br>**‘क’ स्तम्भः** — **‘ख’ स्तम्भः**<br>(i) स्वायत्तमेकान्तगुणं विधात्रा। — (क) केवलं जन्महेतवः।<br>(ii) आचार्याय प्रियं धनमाहृत्य — (ख) स ताभ्यो बलिमग्रहीत्।<br>(iii) स पिता पितरस्तासां — (ग) प्रजातन्तुं मा व्यवछेत्सीः।<br>(iv) प्रजानामेव भूत्यर्थं — (घ) विनिर्मितं छादनमज्ञतायाः। | ½×4=2 |
| | | |
| 15. | अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्)<br>(i) शुल्के **विपणितं** राज्यं पुत्रार्थे यदि याच्यते।<br>(ii) अक्षोभ्यः लक्ष्मणः **क्षोभितः**।<br>(iii) ततः **पुरतः** पश्यन् अवादीत्।<br>(iv) भवान् **तुरीय**-आश्रमसेवीति प्रणम्यते।<br>**मञ्जूषा**<br>कोपितः, चतुर्थः, विक्रीतम्, समक्षम् | ½×4=2 |
| | | |

## खण्डः – घ

## भागः - II 10 अङ्काः

## सामान्यसंस्कृतसाहित्यपरिचयः

| | | |
|---|---|---|
| 16. | अधोलिखित-प्रश्नानाम् उत्तराणि लिखत- (केवलं प्रश्नत्रयम्)<br>(i) " दौवारिकस्य निष्ठा " इत्यस्य पाठस्य सन्दर्भग्रन्थः कः? | 1×3=3 |

| | | |
|---|---|---|
| | (ii) " पुरन्ध्रीपञ्चकम् " इति नाटकात् कः पाठः सङ्कलितः?<br>(iii)" रघुवंशम्" इत्यस्याः रचनायाः लेखकः कः?<br>(iv)" मातुराज्ञा गरीयसी " इत्यस्य पाठस्य सन्दर्भग्रन्थः कः? | |
| | | |
| 17. | मञ्जूषायाः साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत - (केवलं प्रश्नत्रयम्)<br>(i) 'शिशुपालवधम्' इति महाकाव्यस्य लेखकः----------।<br>(ii) महाकविना बाणभट्टेन विरचिता कादम्बरी एका ------------- अस्ति ।<br>(iii) महाकाव्यस्य आरम्भे नमस्कारात्मकम् आशीर्वचनात्मकम् वा ---------- भवति ।<br>(iv) भारतस्य स्वातन्त्र्यम् अधिकृत्य विलिखितं बृहत्तमं चम्पूकाव्यं ---------- इति विद्यते।<br>मञ्जूषा<br>कथा, मातृमुक्ति-मुक्तावली, मङ्गलाचरणम्, माघः | 1×3=3 |
| | | |
| 18. | समुचितं मेलयत -<br>भागः क — भागः ख<br>(i) रूपकस्य भेदाः — (क) भवभूतिः<br>(ii) शूद्रकः — (ख) नाट्य-शास्त्रम्<br>(iii) भरत-मुनिः — (ग) दश<br>(iv) उत्तररामचारितम् — (घ) मृच्छकटिकम् | 1×4=4 |

************************************